**PAPER - 4**

# MT

**2017 .... .... 1100** **Seat No.** | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I PAPER - IV**

**Time : 3 Hours** **(Pages 10)** **Marks : 80**

---

## ✶ प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

अन्तजार्लम् ज्ञानवृद्धिकरः वरः, यतः .........

(तत् अस्मभ्यं सर्वसुखं यच्छति / तत् अस्मासु सर्वविधं संज्ञापनं वितरति।)

II) पूर्णवाक्येन उत्तरत । १

आर्थिकमन्दायने किं वरदानम् अस्ति ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

अन्तर्जालमेव प्राचीनकालस्य कल्पवृक्षः।

यथा प्राचीनकाले कल्पवृक्षस्तथाऽर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः । निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यतेऽनेन । नानाशास्त्रकलानां ज्ञानं, वैश्विकवार्ताः, विविधसंस्थानां विभागानां च संज्ञापनं, सहस्रशः ग्रन्थाः, पर्यटनार्थमुपयुक्तज्ञानमासनारक्षणं च, दूरस्थानां दर्शनं तैश्च सह संभाषणं, सामान्यज्ञानं चेति समुपलभ्यतेऽनेन तन्त्रज्ञानेन । एष आधुनिकः कल्पवृक्षःअस्मभ्यं /अस्मासु सर्वविधं संज्ञापनं वितरति । सांख्यिकीयं ज्ञानं तथा सङ्गणकयन्त्रस्य 'सॉफ्टवेअर' इति कार्यक्रमोऽपि अन्तर्जाले उपलब्धो भवति । तस्य साहाय्येन विविधविषयकाणि नानाकार्याणि विना कर्गजं शीघ्रतया सहजतया विना प्रमादं स्वल्पमानवीयबलेन कर्तुं शक्नुवन्ति सर्वे जनाः । अधुना आर्थिकमन्दायने तु सङ्गणकीयवाणिज्यं (E-Commerce) वरदानमेवेति सिद्धम् । आयुर्विमा-विद्युद्-दूरदर्शन-दूरध्वनि-सेवाशुल्कानि तथा विविधव्यवहारार्थं धनस्य हस्तान्तरणमनेन तन्त्रज्ञानेन कर्तुं शक्नुमो वयम् । एतदर्थं सद्यस्क-कुसीदवृत्तिः (Online Banking) अवलम्ब्यते । जनाः सङ्गणकीयपत्रेण (E-mail) सत्वरं स्वसन्देशं प्रेषयन्ति तथा सद्यस्क-आलापमपि कुर्वन्ति । एवं ज्ञानवृद्धिकरः वरः खलु एषः । अस्यान्तर्जालस्योपयोगः केवलं मानवहितायैव भवतु ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

i) मानवहितायैव - ............. + ............. ।

(मानवहिताये + एव, मानवहिताय + एव, मानवहितायै + एव)

II) चतुर्थपदं लिखत । १

i) आधुनिकः : अर्वाचीनः :: शीघ्रम् : ....... ।

ii) शापः : वरः :: सह : ....... ।

III) गद्यांशात् चित्वा विशेषणं लिखत । १

i) ....... संज्ञापनम् । ....... नानाकार्याणि ।

IV) गद्यांशात् चित्वा सप्तम्यन्तशब्दौ लिखत । १

**३. स्वमतप्रकटनम् ।** २

अधुना सङ्गणकीयवाणिज्यं कथम् आवश्यकम् इति माध्यमभाषया स्पष्टीकुरुत ।

**ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) विविधसमस्यानां निराकरणार्थं भिक्षवः गौतमबुद्धं प्रति गच्छन्ति, यतः ............ १
(बौद्धविहारे एतादृशी आज्ञा वर्तते । / भगवान् सुगतः एवास्माकं पिता इति भिक्षवः मन्यते स्म ।)

II) कः कं वदति । १
''कुत्रास्ति ते पुरातनमुपधानम् ।''

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १
भिक्षुणा पुरातनपादपोशिनः उपधानं कृतम् ।

अवन्तीनगराद् बहि रासीद् विशालं रमणीयं तपोवनम् । पत्रपुष्पफलच्छायायुतैः वृक्षैः विराजमानं, विविधपशुपक्षिभिः समाश्रितं, तपोधनानां निवासस्थानं खल्वेतत्तपोवनम् । तत्रासीदेकः विख्यातः बौद्धविहारः । भगवतः सुगतस्य बहवोऽनुयायिनः तत्रोषित्वा तथागतस्योपदेशमनुसरन्तः भिक्षुव्रतानां पालनं कुर्वन्ति स्म । भगवान् सुगत एवास्माकं पिता इत्येवं मन्यन्ते स्म ते भिक्षवः । अतः विविधसमस्यानां निराकरणार्थं ते स्वयं गौतमबुद्धं प्रति गच्छन्ति स्म । एकदा कोऽपि भिक्षुःभगवन्तं प्रति जगाम । तं प्रणम्य अधोमुखः सोऽतिष्ठत् । भगवता पृष्टः सः अकथयत्, ''मम चीवराणि जीर्णानि अतः प्रार्थये ददातु मे नूतनचीवराणि ।'' ततः भगवता पृष्टं किं कृतं त्वया पुरातनचीवराणाम्? स प्रत्यवदत्, ''भगवन्, तत् चीवरं मया शयनीयरूपेणोपयोजितम्'' । भगवान् पप्रच्छ ''किं कृतं त्वया पुरातनशयनीयस्य।'' स उवाच अहं रात्रौ तद् उपधानरूपेण गृह्णामीति । तदाकर्ण्य कुतुहलेन भगवान् अवोचत्, ''वत्स ! कुत्रास्ति ते पुरातनमुपधानम् ।'' तदपि जीर्णं जातमतः मया तद् पादस्वच्छीकरणाय द्वारे पादपोशी इति स्थापितं तथा च पुरातनपादपोशिनः सूत्राणि दीपस्य कृते वर्तिरूपेण उपयुज्यन्ते मयेति प्रत्युवाच सः । तच्छ्रुत्वा प्रसन्नचित्तेन भगवता तस्मै नूतनचीवराणि दत्तानि ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) पूर्वपदं लिखत । १

i) जातमतः = ....... + अतः । ii) मयेति = ....... + इति ।

II) समूहेतरपदं चित्वा लिखत । १

i) तथागतः, भिक्षुः, सुगतः - ....... ।

ii) शयनीयम्, जीर्णम्, पुरातनम् - ....... ।

III) विशेषण-विशेष्ययोः मेलनं कुरुत । १

| | अ | ब |
|---|---|---|
| (1) | जीर्णानि | बौद्धविहारः। |
| (2) | जीर्णम् | चीवराणि । |
| (3) | विख्यातः | |

IV) गद्यांशे आगते २ द्वितीयान्तपदे ........ , ........ । १

३. **पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

i) नूतनचीवराणां प्राप्तिः ।

ii) पुरातनचीवराणां सदुपयोगविषये कथनम् ।

iii) भगवन्तं प्रति गमनम् ।

iv) नूतनचीवराणां कृते प्रार्थना ।

**क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

लद्दाखप्रान्तादपि नैके खगाः अत्र आगच्छन्ति, यतः .........

(तत्र तेषा कृते आवासाः न सन्ति / तत्र हिमसमयः वर्तते ।)

II) पूर्णवाक्येन उत्तरं लिखत । १

केवलदेवराष्ट्रीयोद्याने केषां कृते विविधप्रकाराणि स्थलानि निर्मितानि ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

केवलदेवराष्ट्रीयोद्यानं द्रष्टुं द्वित्राः दिनाः पर्याप्ताः ।

एतावद् विशालं वनं द्रष्टुं द्वित्राः दिनाः न पर्याप्ताः, यतोऽस्य क्षेत्रं विस्तीर्णं वैविध्यपूर्णं च। विविधस्वरूपाणां खगानां कृते विविधप्रकाराणि स्थलानि अत्र निर्मितानि । स्थलपक्षिणां शुष्का तृणस्थली, जलविहगार्थं जलस्थली, आनूपं वा स्थलम् अपि च वृक्षखगानामधिवासभूताः महावृक्षा अपि अत्र विद्यन्ते । नैकानि सारङ्गागाराणि विविधवर्णैः खगैः आवासार्थमङ्गीकृतानि अत्र । वृक्षपक्षिणः, तृणपक्षिणः अपि च जलपक्षिणोऽपि अत्र बहुसंख्यया वसन्ति । तेषां त्रिशतषट्षष्टिमिताश्च प्रजातयः सुखेन वसन्ति क्रीडन्ति च । तित्तिरसदृशाः तृणपक्षिणः क्रीडन्तः दृश्यन्ते । वृक्षेषु चित्रबलाकानां कुलानि कलकलं कुर्वन्ति पर्यटकानां चेतांसि

हरन्ति। विविधप्रकारकाः क्रौञ्चाः तृणेषु भक्ष्यं गवेषमाणाः दूरतः नयनपथमायान्ति । जलेषु खगानां बहवः जातिविशेषाः विहरन्तः दृश्यन्ते । श्वेतः चमसचञ्चूः इति पक्षिविशेषः सविशेषं लक्ष्यते । अन्येऽपि पक्षिणोऽत्र शीतवासार्थं देशान्तरादपि आयान्ति । सैबेरियादेशात् आगच्छन्तः अत्र शीतर्तौ वसन्तः क्रौञ्चाः अधुना नामशेषतां गताः इति तु दुःखकरं लज्जास्पदमपि । लद्दाखप्रान्तादपि नैके खगा आगत्य अत्र हिमसमये वसन्ति । एतान् स्थलान्तरितान् खगान् द्रष्टुं तेषां विषये चाधिकं ज्ञातुं पर्यटकाः अभ्यासकाश्च बहुसंख्ययात्र आगच्छन्ति देशविदेशेभ्यः । तेषामध्ययनार्थं वलयाङ्कनमपि कृतं वर्तन्ते पक्षिमित्रैः ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) पूर्वपदं लिखत । १

i) जलपक्षिणोऽपि - .......... + अपि ।

ii) देशान्तरादपि - .......... + अपि ।

II) गद्यांशतः विलोमपदे चिनुत । १

i) सुखकरम् × ..........।

ii) यान्ति × ..........।

III) विशेषण-विशेष्ययोः मेलनं कुरुत । १

| | अ | ब |
|---|---|---|
| (1) | विविधप्रकारकाः | वनम् |
| (2) | विशालम् | स्थलानि |
| | | कौञ्चाः |

IV) गद्यांशे आगते द्वे सप्तम्यन्तपदे ............., ............. । १

३. **पृथक्करणम् ।** (पक्षिणां नामानि लिखत ।) २



## ✶ द्वितीयः विभागः - पद्यम् ।

**प्र.२. अ) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. पृथक्करणम् ।** २

श्लोके आगतानि ईश्वरस्य विशेषणानि




अव्यक्तं व्यापकं नित्यं गुणातीतं चिदात्मकम् ।
व्यक्तस्य कारणं वन्दे व्यक्ताव्यक्तं तमीश्वरम् ।।१।।
मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत् सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला -
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ।।२।।

**२. माध्यमभाषया लिखत ।** २

द्वितीयश्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. शब्दज्ञानम् ।**

I) विलोमशब्दौ चित्वा लिखत । १

i) दुःखम् × ....... ।

ii) दुर्भाग्यम् × ....... ।

II) विशेषण - विशेष्यानां मेलनं कुरुत । १

| | अ | ब |
|---|---|---|
| (1) | मकरन्दतुन्दिलानाम् | मधुकरे । |
| (2) | समुपागतवति | महामान्यः । |
| | - | अरविन्दानाम्। |
| | - | दैवात्। |

तन्मूलं गुरुतायास्तत्सौख्यं तद्यशस्तदौर्जित्यम् ।
तत्सौभाग्यं पुंसां यदेतदप्रार्थनं नाम ॥१॥
समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः ।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ॥२॥
दुःखिताः परदुःखेषु निर्लोभा दुर्लभेषु च ।
विपक्षेषु क्षमावन्तः सन्तः सुकृतपादपाः ॥३॥

२. **अन्वयपूर्तिः ।** २

परदुःखेषु ......., दुर्लभेषु ......., ....... क्षमावन्तः च ....... सुकृतपादपाः (इव) ।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) मुहूर्तं .............. मृदुः ॥

ii) अङ्गेन .............. रात्रिः ॥

iii) यो .............. निवर्तते ॥

**ड) वृत्तनाम चिनुत ।** १

ज्ञानेन पुंसां सकलार्थसिद्धिर्ज्ञानादृते काचन नार्थसिद्धिः ।
ज्ञानस्य मत्वेति गुणान् कदाचिज्ज्ञानं न मुञ्चन्ति महानुभावाः ॥

अस्य श्लोकस्य वृत्तनाम ......... इति । ( गीतिः / उपेन्द्रवज्रा / इन्द्रवज्रा)

## ✶ तृतीयः विभागः - स्थूलवाचनम् ।

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

संस्कृतवाङ्माहात्म्यं विशदीकुर्वंस्तदा भीमरायः ।
प्रोवाच संस्कृता वाक् भारतीयसंस्कृतेर्मूलम् ॥१॥
नैकगिरां प्रसवित्री भिन्नप्रान्तीयभारतीयानाम् ।
मान्या सदैव विदुषाम् अर्हति नो राष्ट्रभाषात्वम् ॥२॥
कैश्चित्सांसदमुख्यैः संस्कृतवाग् भवतु राष्ट्रभाषेति ।
प्रस्ताव उपन्यस्तो भीमस्तेषामभूत् प्रमुखः ॥३॥
मैत्रोपनाम विद्वाञ् ज्ञातुं भीमस्य संस्कृतज्ञानम् ।
पप्रच्छ भीमरायं संस्कृतवाण्यैव निजशङ्काः ॥४॥
प्रत्युत्ततार मैत्रं गीर्वाणगिरैव भीमरायोऽपि ।
श्रुत्वा तत्संवादं सर्वेऽप्यासन् चकितचकिताः ॥५॥
वृत्तं तन्नैकेषु प्रकाशितं प्रमुखवृत्तपत्रेषु ।
पाठं पाठं सर्वे प्रभावितास्तस्य चातुर्यात् ॥६॥
प्रस्तावश्चर्चान्ते न पारितो नैकसांसदविरोधात् ।
तेनाभवन् विषण्णाः सर्वे ये संस्कृते रक्ताः ॥७॥

रात्रिंदिवं पठित्वा ग्रन्थान् नानाविधान् संहितार्थम् ।
विरचय्य नूतनविधीन् स्त्रीदलितान् समावेशयत्तस्याम् ॥८॥
अभ्यस्य नैकस्मृतीर् मनुभारद्वाजयाज्ञवल्क्याद्याः ।
चर्चित्वा विद्वद्भिः प्रारूपं रचितं भीमरायेण ॥९॥

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १
भीमरायः मैत्रम् आङ्ग्लभाषया प्रत्युत्ततार ।

II) एकपदेन उत्तरं लिखत । १
संस्कृतप्रस्तावः कस्मात् न पारितः?

**२. पृथक्करणम् ।** २
पद्यांशं पठित्वा जालरेखाचित्रं पूरयत ।

संस्कृतवाक्
- ....... मूलम् ।
- नैकगिरां ....... ।
- सदैव विदुषां ....... ।
- ....... अर्हति ।

**✶ चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) परिच्छेदपूर्तिः ।**

मञ्जूषातः उचितशब्दान् चित्वा परिच्छेदं पुनर्लिखत । ५

अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः। तत्र निर्मितेषु नीडेषु पक्षिणः वर्षास्वपि सुखेन निवसन्ति। अथैकदा धारासारैर्महती ....... बभूव। तदा तरुतले अवस्थितान् शीतार्तान् कम्पमानान् वानरानवलोक्य पक्षिभिरुक्तम् अस्माभिश्चञ्चुभिस्तृणानि ....... नीडाः निर्मिताः। यूयं हस्तपादादिसंयुताः अपि किमवसीदथ। तच्छ्रुत्वा वानराः .......। तैरालोचितम् एते नीडास्थिताः ....... पक्षिणः अस्मान् निन्दन्ति। तद् भवतु वृष्टेः उपशमः। शान्ते पानीयवर्षे तैर्वानरैः वृक्षमारूह्य सर्वे ....... भग्नाः पक्षिणामण्डानि च अधः पातितानि। अत उच्यते उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।

(सुखिनः, नीडाः, वृष्टिः, क्रुद्धाः, आहृत्य)

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. ज्ञानं महद् धनम् ।   २. उद्यानम् ।   ३. बालकदिनम् ।

**क) संस्कृतानुवादः ।**

८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत । ५

i) I do not remember children's names.

ii) The birds build the nests on the branches of trees.

iii) Tigers do not eat grass and the tree leaves.

iv) Justice should punish the guilty.

v) Have you read that news?

vi) Trees make the passers-by happy by their shadow.

vii) If I will go to Kashi, I will bring many books of Sanskrit.

viii) The trees grow on the mountain.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१. धातु गम् - गच्छ् (१ प.प.) २. धातु वि + तॄ (१ प.प.)

३. धातु रक्ष् (१ प.प.) ४. धातु सम् + ऋ (१ प.प.)

ii) अशुद्धिसंशोधनम्-अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१. अलं चिन्ता ।

२. ग्रन्थालये बालेषु कृते स्वतन्त्रः विभागः अस्ति ।

३. भरतः अयोध्यायाः प्रति गच्छति ।

४. स्वस्ति तस्मात् ।

**★ पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।**

**प्र.५. यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | आज्ञार्थः | वर्तमानकालः | परोक्षः भूतकालः | विध्यर्थः | द्वितीयः भविष्यकालः | प्रथमः भूतकालः |
|---|---|---|---|---|---|---|
| या(२ प.प.) | ...... | याति | ...... | यायात् | ...... | ...... |
| ज्ञा (९आ.प) | जानीताम् | ...... | ...... | ...... | ...... | अजानीत |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नाम | ...... | ...... |
| तृतीया | ...... | तन्तुभ्याम् | ...... |
| षष्ठी | अस्य | ...... | एषाम् |
| द्वितीया | ...... | ...... | सर्वान् |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(विराजमानम्, नीतवती, कर्तव्ये, कथितः, स्मरन्, खण्डिता, अनुकरणीया, कृतवत्)

**ड) समासाः ।**

**विग्रहवाक्यानां समासनामभिः सह मेलनम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | अ | ब |
|---|---|---|
| i) | महान्तः वृक्षाः । | इतरेतर द्वन्द्व समास |
| ii) | इच्छाम् अनुसृत्य । | उपपद तत्पुरुष समास |
| iii) | पीताः च कृष्णाः च । | बहुव्रीहि समास |
| iv) | न अभिद्रोहः । | सप्तमी तत्पुरुष समास |
| v) | दुःखेन लभ्यन्ते इति । | कर्मधारय समास |
| vi) | जलविहगेभ्यः इदम् । | नञ् तत्पुरुष समास |
| vii) | महान् उदयः यस्य सः । | चतुर्थी तत्पुरुष समास |
| viii) | चिन्तने मग्नः । | अव्ययीभाव समास |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) भरतमुनिना नाट्यशास्त्रं विरचितम्। (प्रयोगं परिवर्तयत।)

ii) भवान् प्रभाते पद्भ्यामागच्छतु। (भवान् इति पदस्थाने 'त्वम्' योजयत।)

iii) समाप्तेऽध्ययने रॉथफिल्डमहोदयेन टागोरमहोदयेन सार्धं परिचयः कारितः। (सतिसप्तमीरचनां निष्कासयत।)

vi) राष्ट्रध्वजः मां कीर्तिकथाः स्मारयते । (प्रयोजकरचनां निष्कासयत।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) साहित्ये ......... रसाः सान्ति । (9)

ii) मम .......... सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम् । (6)

iii) देवक्याः .......... अपत्यं नाम भगवान् श्रीकृष्णः । ($8^{th}$)

iv) मम सखी दिनस्य .......... मम गृहम् आगच्छति । (twice)

**✶ षष्ठः विभागः - अनुवादकौशल्यम् ।**

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

अधुना सर्वत्र सन्त गाडगेबाबा-नागरी-स्वच्छताभियानस्य प्रसारः भवति । एतद् अभियानं तु अतीव उपयुक्तम्। स्वच्छतायाः महत्त्वं तु सर्वे जानन्ति। किन्तु न केवलं स्वगृहस्य स्वच्छता अपि तु परिसरस्य स्वच्छता अत्र अभिप्रेता। सुहृदः, अत्र एकत्रीभूय वयं सर्वेऽस्मिन् अभियाने सहभागिनः भवेम तथा तस्य लाभार्थिनः अपि। एकस्मिन् दिने किमपि परिवर्तनं न जायते। किन्तु सर्वत्र विविधैः अल्पसमूहैः अङ्गीकृतं स्वच्छताभियानं शनैः शनैः सफलीभवेत्।

**ब) संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

धनेन किं दानपराङ्मुखाणां
श्रुतेन किं द्वेषवशीकृतानाम् ।
रूपेण किं सद्गुणवर्जितानां
कुलेन किं शीलविनाशकानाम् ।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

भरतः – अथ तुल्ये पुत्रविप्रवासे कथमहमरण्यं न प्रेषितः ।
कैकेयी – जात ! मातुलकुले वर्तमानस्य प्रकृतिभूतस्ते विप्रवासः ।
भरतः – अथ चतुर्दशवर्षाणि किं कारणमवेक्षितानि ।
कैकेयी – जात ! चतुर्दश दिवसा इति वक्तुकामया पर्याकुलहृदयया चतुर्दशवर्षाणीत्युक्तम् ।
भरतः – अस्ति पाण्डित्यं सम्यग् विचारयितुम् ।

**Best of Luck**